# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Half Yearly Examination (2023 – 2024)**

**Class X** **MM: 80**
**Subject: Sanskrit** **Time: 3. Hrs.**
Name: ____________ Roll No.:__________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***
***General Instructions: All questions are compulsory***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | अपठित अवबोधनम् | (10 अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड ग | अनुप्रयुक्तव्याकरणम् | (25 अङ्काः) |
| खण्ड घ | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## (खण्ड–क) अपठित–अवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

मम प्रिय पुस्तकं रामायणम् अस्ति। अस्मिन् ग्रन्थे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनवृत्तं वर्तते। अस्य लेखकः महर्षि वाल्मीकिः आसीत्। सः आदिकविः आसीत् अतः तस्य रचनां 'आदिकाव्यम्' इति कृत्वा विद्वांसः स्मरन्ति। एतत् काव्यं अनुष्टुप्–छन्दसि निबद्धम्। अत्र श्लोकानां संख्या चतुर्विंशतिसहस्रं वर्तते, तेन रामायणं 'चतुर्विंशति–साहस्री संहिता' इति नाम्ना अपि विद्वद्भिः स्मर्यते,। इदं कविना नारदमुनेः प्रेरणया ब्रह्मणः वचनेन च रचितम्।

**I एकपदेन उत्तरत –** *(केवलं प्रश्नद्वयम्)* **(1X2=2)**

- **i** रामायणे कस्य जीवनवृत्तं वर्तते ?
- **ii** रामायणं केन नाम्ना विद्वद्भिः स्मर्यते ?
- **iii** इदं कविना कस्य प्रेरणया रचितम् ?

**II पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(2X2=4)**

- **i** विद्वांसः रामायणम् 'आदिकाव्यम्' इति कृत्वा किमर्थं स्मरन्ति ?
- **ii** कविना रामायणं कस्य प्रेरणया कस्य वचनेन च रचितम् ?
- **iii** रामायणे 'श्लोकानां संख्या कति वर्तते ?

**III अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** ( उचित शीर्षक लिखिए) **(1X1=1)**

IV प्रदत्तः विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– *(केवलं प्रश्नत्रयम्)* **(1X3=3)**

i 'रचितम्' इति क्रियापदस्य कर्तृपदम् किम् ?

(अ) रामायणम् (ब) विद्वांसः (स) श्रीरामः (द) कविना

ii 'विद्वांसः' इति कर्तृपदस्य क्रियापदम् किम् ?

(अ) अस्ति (ब) वर्तते (स) मन्यन्ते (द) स्मरन्ति

iii 'महर्षिः' इति पदस्य अनुच्छेदे विशेष्य पदम् किं ?

(अ) वाल्मीकिः (ब) लेखकः (स) कविना (द) प्रियम

iv 'मूर्खाः' इति पदस्य कः विपर्ययः अनुच्छेदे प्रयुक्तम् ?

(अ) पुस्तकम् (ब) कवि (स) रामायणम् (द) विद्वांसः

## (खण्ड–ख) रचनात्मकं कार्यम्

**प्र0 2** भवत्याः नाम गरिमा अस्ति। भवती प्रधानमन्त्रिणा उद्घोषितं 'बेटी बचाओ, बेटी पढ़ाओ' विषयमुपरि एकं स्वलेखं प्रकाशयितुम् इच्छति। अतः देशस्य प्रतिष्ठित–पत्रिकायाः जागरणस्य सम्पादकं प्रति लिखिते पत्रे मंजूषायाः सहायतया: पत्रं पुनः लिखत– **(½X10=5)**

*(आपका नाम गरिमा है। 'बेटी बचाओ, बेटी पढ़ाओ' विषय पर लिखे गए अपने लेख को 'जागरण' पत्रिका में प्रकाशित करने हेतु संपादक को पत्र लिखिए )*

Q–18 सावित्री नगर
(1) ————
दिनांकः 16/09/2023

सेवायाम्,
आदरणीयः (2)————
'जागरणम्' साप्ताहिकम्
चक्रधर नगर, रायगढ़
विषयः –– 'बेटी बचाओ, बेटी पढ़ाओ' विषये लिखितं स्वलेखं प्रकाशनार्थं पत्रम्।
महोदयः!

सविनयं निवेदनम् अस्ति यत् सम्माननीयः प्रधानमन्त्रिणा श्रीमोदी (3) ––––– संचालितम् अभियानं 'बेटी बचाओ, बेटी पढ़ाओ' कन्यानां संरक्षणार्थं सम्पूर्णे (4)–––––प्रचलति। इदम् अभियानं देशाय अति लाभकरं वर्तते। अनेन देशे (5)––––– संख्यासु वृद्धिः अभवत्। मया अस्मिन् (6)–––––– एकः लेखः लिखितोऽस्ति। अतः एकेन पत्रेण सह तं (7)–––––– प्रकाशनार्थं भवतां सेवायां प्रेषयामि। कृपया स्वप्रतिष्ठित–पत्रिकायाम् इमं लेखं प्रकाशित्य माम् अनुगृह्णातु (8)––––––– ।
आशास्ति यत् अनेन लेखेन नारीं प्रति (9)–––––– जनेषु आगमिष्यति।
(10)–––––––विश्वासुः
गरिमा

| |
|---|
| अभियाने, महाभागेन, तमनारम्, देशे, संपादक महोदयः, कन्यानाम्, भवत्याः, लेखम्, जागरुकता, भवान् |

प्र03 मंजूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पंचवाक्यानि संस्कृतेन लिखत– (1X5=5)

| |
|---|
| ऐतिहासिकः, भारतसर्वकारः, संस्कृति मंत्रालयः, अमृत महोत्सवः, संपूर्णदेशे, कार्यक्रमाः, विद्यालये, संस्थायाम्, सांस्कृतिक, सर्वे जनाः, स्वतंत्रता, त्रिवर्ण ध्वजः, मिष्टान्नानि, |




प्र0 4 **अधोलिखितानां वाक्यानां संस्कृतेन अनुवादः क्रियताम्**–(*केवलं वाक्यपंचकं*) **(1x5=5)**

**क)** आज निश्चय ही वर्षा होगी ।
**ख)** उद्यान में फूल खिलते हैं।
**ग)** मोर नदी के किनारे नाचता है।
**घ)** पुस्तकालय कहाँ है ?
**ङ)** वह गाय का दूध पीता है।
**च)** हम सब आम खाते हैं।
**छ)** पुस्तक में कविता नहीं है।

## (खण्ड–ग) अनुप्रयुक्तव्याकरणम्

प्र0 5 **अधोलिखित वाक्येषु स्थूलपदानां समुचितं संधि–विच्छेदं वा प्रदत्त विकल्पेभ्यः चित्वा** लिखत– ***(केवलं प्रश्नचतुष्टयम्)*** **(1X4=4)**

**i** **जगत् + नाथः** चतुर्भुजो अस्ति।

(क) जगतनाथः (ख) जगनाथः
(ग) जगत्नाथः (घ) जगन्नाथः

**ii** **कश्चित्** जनः शनैः चलति ?

(क) कस् + चित् (ख) कः + चित्
(ग) कश + चित् (घ) को + चित्

iii वेदानां **सामवेदोऽस्मि** अहम्।

(क) सामवेदः + अस्मि (ख) सामवेदो + अस्ति

(ग) साम + वेदोस्मि (घ) सामवेदाः + अस्मि

iv गणेशः **षट् + आनन** अपि कथ्यते ।

(क) षाडानन (ख) षडानान

(ग) षडानन (घ) षडानना

V **जगदीश्वरः** बालकान् रक्षति।

(क) जगदी + ईश्वरः (ख) जग + दीश्वरः

(ग) जगत् + ईश्वरः (घ) जगदीश + वरः

**प्र0 6 अधोलिखित वाक्येषु स्थूलपदानां समासं–विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत।**
***(केवलं प्रश्नचतुष्टयम्)*** **(1x4=4)**

i त्वं **यथासमयम्** विद्यालयं गच्छसि?

(क) समयेन अनतिक्रम्य (ख) समयम् अनतिक्रम्य

(ग) समयः अनतिक्रम्य (घ) समयस्य अनतिक्रम्य

ii इदं स्थानं **निर्मक्षिकम्** अस्ति ।

(क) मक्षिकस्य अभावः (ख) मक्षिके अभावः

(ग) मक्षिकायां अभावः (घ) मक्षिकाणाम् अभावः

iii **विद्यायाः हीनः** नरः पशुसमानः भवति।

(क) विद्यांहीनः (ख) विद्यायहीनः

(ग) विद्याहीनः (घ) विद्यहीना

iv इंद्रप्रस्थमहानगरं **यमुनातीरे** वर्तते।

(क) यतुनम तीरे (ख) यमुनायाः तीरे

(ग) यमुनात् तीरे (घ) यमुनः तीरे

v **सतां आचारः** सदैव पालनीयः।

(क) सदाचारम् (ख) सदाचारेण

(ग) सदाचारः (घ) सदाचारैः

प्र0 7 प्रदत्त विकल्पेभ्यः स्थूलपदानां प्रकृति–प्रत्ययौ उचितम् उत्तरं चित्वा लिखत–

*(केवलं प्रश्नचतुष्टयम्)* **(1X4=4)**

i मनुष्यः **समाज + ठक्** प्राणी अस्ति।

(क) समाजम् (ख) सामाजीक

(ग) सामाजिक (घ) समाजिक

ii जलस्य **महत्त्वम्** सर्वे जनाः जानन्ति।

(क) महता + तव (ख) महत्वं + त्वं

(ग) महत् + त्व (घ) महान् + तल्

iii सा बालिका **बुद्धि + मतुप्** अस्ति।

(क) बुद्धिमान् (ख) बुद्धिमानाः

(ग) बुद्धिवती (घ) बुद्धिमती

iv एषा रमणीया सृष्टि कलहेन **दूषित + टाप्** न कर्तव्या।

(क) दूषिताः (ख) दूषितः

(ग) दूषिता (घ) दुषीता

v सिंहं दृष्ट्वा सा **चिन्तितवत् + ङीप्** ।

(क) चिन्तयति (ख) चिन्तितवती

(ग) चिन्तिता (घ चिन्तयन्ति

प्र0 8 अधोलिखित वार्तालापे रिक्तस्थानानि कर्म–कर्तृपदैः च पूरयित्वा लिखत–

*(केवलं प्रश्नत्रयम्)* **(1X3=3)**

**कविता** – सुदेशः त्वं ——(चित्र) पश्य।

(क) चित्र (ख) चित्रम्

(ग) चित्रः (घ) चित्रस्य

**सुदेशः** – आम् कविते! मया चित्रं —— (दृश्)।

(क) दृश्यते (ख) दृश्यन्ते

(ग) दृश्यसे (घ) दृश्ये

**कविता** – अस्मिन् चित्रे एषः बालकः किं —— ( कृ )?

(क) क्रियते (ख) करोषि

(ग) कुर्वन्ति (घ) करोति

**सुदेशः** – अस्मिन् चित्रे एतेन —— (बालक) पुस्तकं पठ्यते।

(क) बालकः (ख) बालकौ

(ग) बालकेन (घ) बालकाय

प्र0 9 कोष्ठगत अंकानांस्थाने संस्कृतपदेषु समयं लिखत– *(केवलं प्रश्नचतुष्टयम्)* **(1X4=4)**

i प्रातः (7:30) ------ वादने योगाभ्यासः ।

ii प्रातः (8:45) ------- वादने संगीत प्रस्तुतिः।

iii प्रातः (10:15) ------- वादने मुख्यातिथिः आशीर्वादम् अददात्।

iv प्रातः (11:00) -------- वादने प्रसादवितरणं समापनं च।

v प्रातः (11:30) -------- वादने सर्वे स्व–स्व गृहं प्रति गच्छन्ति।

**प्र0 10 मंजूषायां प्रदत्तैः उचितैः अव्ययपदैः वाक्येषु रिक्तस्थानानि पूरयत– (½X6=3)**

| तदा, मा, कुतः, यत्, श्वः, तथा |
|---|

i भवती अधुना ------- आगच्छति ?

ii यदा कृष्ण अत्र आगच्छत् ------ वृष्टिः अभवत्।

iii अहम् ------ प्रातः सप्तवादने गीतायाः पाठं करिष्यामि।

iv अत्र ध्वनिं ------ कुरु।

v किम् त्वम् जानासि ------ भारतीया संस्कृतिः अतिप्राचीना अस्ति।

vi यथा राजा ------- प्रजा।

**प्र0 11 अधोलिखितवाक्येषु रेखांकितपदं अशुद्धमस्ति। विकल्पेभ्यः शुद्धंपदं चिनुत–**
*(केवलं प्रश्नत्रयम्)* **(1X3=3)**

i सः <u>कलमात्</u> लिखति।
(क) कलमेन (ख) कलमानि
(ग) कलमस्य (घ) कलमम्

ii किं त्वम् श्वः <u>गच्छसि</u> ?
(क) गमिष्यति (ख) गमिष्यसि
(ग) अगच्छः (घ) गच्छ

iii द्वे छात्रे अत्र <u>पठन्ति</u>।
(क) पठति (ख) पठतः
(ग) पठथः (घ) पठामि

iv भवान् किमर्थम् विद्यालयं न <u>गच्छसि</u>।
(क) गच्छति (ख) गच्छतः
(ग) गच्छन्ति (घ) गच्छामि

## (खण्ड–घ) पठित अवबोधनम्

**प्र0 12 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीनः इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न ? इति प्रत्यवोचत्। "भद्रे! नूनम्, सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन् एव एतादृशं वात्सल्यं कथम् ? इति इन्द्रेण पृष्टा। सुरभिः प्रत्यवोचत्।

**I एकपदेन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(½X2=1)**

i पुत्रस्य दैन्यं दृष्ट्वा का रोदिति ?

ii कः बलीवर्दं बहुधा पीडयति ?

iii कः कृच्छ्रेण भारम् उद्वहति ?

**II पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(1X2=2)**

i इन्द्रः सुरभ्यैः किम् अवदत् ?

ii इन्द्रेण पृष्टा का प्रत्यवोचत् ?

iii कृषकः पुत्रेण किं करोति ?

**III निर्देशानुसारम् उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(1X2=2)**

i 'काठिन्येन' इति पदस्य गद्यांशे पर्यायपदम् किम् ?

(अ) कृच्छ्रेण (ब) क्रुद्धः

(स) बहुधा (द) वात्सल्यं

ii 'पीडयति' इति क्रियापदस्य कर्तृपदम् किम् ?

iii 'भवान्' इति सर्वनाम पदं कस्मै प्रयुक्तं ?

**प्र0 13 अधोलिखितं श्लोकं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

विचित्रे खलु संसारे,

नास्ति किंचिन्निरर्थकम्।

अश्वश्चेद् धावने वीरः,

भारस्य वहने खरः।।

**I एकपदेन उत्तरत–***(केवलं प्रश्नद्वयम्)* **(½X2=1)**

i संसारः कीदृशः अस्ति ?

ii कुत्र किंचित् निरर्थकं नास्ति ?

iii भारस्य वहने किम् अस्ति

II पूर्णवाक्येन उत्तरत– *(केवलं प्रश्नद्वयम्)* (1X2=2)

i अश्वखरौ च कीदृशौ वीरौ स्तः ?

ii 'खरः' इति पदस्य कोऽर्थः ?

iii किंचित् निरर्थकं कुत्र नास्ति ?

III निर्देशानुसारम् उत्तरत – *(केवलं प्रश्नद्वयम्)* (1X2=2)

i 'निरर्थकम्', इति पदस्य विलोमपदम् किम्?

(अ) कोऽर्थः (ब) नार्थम्

(स) सार्थकम् (द) निरम्

ii 'विचित्रे संसारे' अनयोः पदयोः विशेष्य पदं किम् ?

iii 'भारस्य वहने खरः' वाक्येऽस्मिन् कर्तृपदम् किम् ?

**प्र0 14 अधोलिखितं नाट्यांशं पठित्वा तदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

**रामः** – अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।

**लवः** – न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

**रामः** – अहो माहात्म्यम्।

**कुशः** – जानाम्यहं तस्य नामधेयम्।

**रामः** – कथ्यताम्।

**कुशः** – निरनुक्रोशो नाम।

**रामः** – वयस्य, अपूर्वं खलु नामधेयम्।

I एकपदेन उत्तरत– *(केवलं प्रश्नद्वयम्)* (½X2=1)

i कुशः किं नाम वदति ?

ii कः वदति अपूर्वं खलु नामधेयम् ?

iii तस्य नाम कुत्र कोऽपि न व्यवहरति ?

II पूर्णवाक्येन उत्तरत– *(केवलं प्रश्नद्वयम्)* (1X2=2)

i रामः किं वेदितुमिच्छति ?

ii कुशः स्वस्य पितुः किन्नाम कथयति ?

iii रामः लवकुशौ किम् पृच्छति ?

III निर्देशानुसारम् उत्तरत– *(केवलं प्रश्नद्वयम्)* (1X2=2)

i 'तस्य नाम व्यवहरति' इत्यत्र क्रियापदम् किम् ?

(अ) तस्य (ब) हरति

(स) नाम (द) व्यवहरति

ii 'तपोवने' इति पदे का विभक्ति अस्ति ?

iii 'ज्ञातुम्' इत्यर्थे किं पदं नाट्यांशे प्रयुक्तम् ?

**प्र0 15 अधोलिखितेषु वाक्येषु स्थूलपदानि आधृत्यप्रश्ननिर्माणं कुरुत–(4) (1X4=4)**

i **महानगरेषु** वाहनानाम् अनन्ताः ।

ii बुद्धिमती **चपेटया** पुत्रौ प्रहृतवती।

iii लवकुशै च **भ्रातरौ** आस्ताम्।

iv **सहस्राधिकेषु** पुत्रेषु सत्स्वपि सा दुःखी आसीत्।

v **अस्तमये** सविता रक्तः भवति।

**प्र0 16 मंजूषातः समुचितं निम्नलिखित श्लोकयोः अन्वयं पूरयत– (½X4=2)**

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

**अन्वयः–** फलच्छायासमन्वितः (1)———सेवितव्यः। (2)———यदि फलं (3)——— (वृक्षस्य) (4)———— केन निवार्यते।

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्य पुरुषः नास्ति योजकस्तत्र दुर्लभः।। (½X4=2)

**अन्वयः–** अक्षरं (1) ——— न अस्ति मूलं (2)———न अस्ति। (3) ——— पुरुषः न अस्ति (4) ——— योजकः दुर्लभः।

| |
|---|
| महावृक्षः, अयोग्यः, दैवात्, अमन्त्रम्, अनौषधम्, तत्र, नास्ति, छाया |

प्र0 17 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य पुनः लिखत– (½X8=4)

*( निम्नलिखित घटनाक्रम को उचित क्रमानुसार पुनः लिखिए।)*

i) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

ii) प्रत्युत्पन्नमतिः सा श्रृगालं आक्षिपन्ती उवाच।

iii) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

iv) मार्गे सा एकं व्याघ्रम् अपश्यत्।

v) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच– अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।

vi) बुद्धिमती पुत्रद्वयेन उपेता पितुगृहं प्रति चलिता।

vii) 'त्वं व्याघ्रत्रयम् आनेतुम्' प्रतिज्ञाय एकमेव आनीतवान्।

viii) गलबद्धः शृगालकः व्याघ्रः पुनः पलायितः।

प्र0 18 अधोलिखित वाक्येषु रेखांकितपदानां प्रसंगानुसारम् उचितार्थं लिखत–

*(केवलं प्रश्नत्रयम्)* (1X3=3)

i आलस्य मनुष्यस्य महान् <u>रिपुः</u> अस्ति ।

(क) मित्रम् (ख) भ्राता

(ग) शत्रुः (घ) पितुः

ii एकान्ते <u>कान्तारे</u> मे संचरणं स्यात्।

(क) गृहे (ख) नगरे

(ग) क्षेत्रे (घ) वने

iii भगवान् <u>सहस्रदीधितिः</u> वंशस्य कर्ता अस्ति।

(क) सूर्यः (ख) चन्द्रमा

(ग) दिनम् (घ) रात्रिम्

iv दीनस्य तु सतः <u>शक्रः</u>।

(क) महेन्द्रः (ख) कविन्द्रः

(ग) इन्द्रः (घ) जयन्तः

---00---